**1A** to go after, to follow ते देवा अंब्रुवन् यान् पशूनुपजीविष्म त इमेंऽन्वाग्मन् TaiS. VII. iii.5.1; उर्वशी वै पुरुरवस्यासीत् ... सः ... तामन्वागच्छत् KāṭhS. 8.10 (i.93.16); (अग्निम्) तमश्विनावन्वागच्छताम् AitBr. 17.3 (455); (रक्षसः) तान्ह स्मान्वेवागच्छन्ति AitBr. 21.1 (545); अथैनत्क्षत्र-मन्वागच्छत् AitBr. 34.2 (862); (ता उ हैता देवता ऊचुः।) या इमा अग्नीषोमावन्वाजग्मुरग्नीषोमौ युवं वै नो भूयिष्ठभाजौ स्थः ŚatBr. I.vi.3.18; ŚatBr.(K.)II.iv.1.12; यत्रेन्द्राग्नीऽउज्जिगीवांऽसौ तस्थतुस्तद्विश्वे देवा अन्वाजग्मुः ŚatBr.II.iv.3.5; ŚatBr.(K.) I.iii.2.6; प्रयाजैर्वै देवाः। स्वर्गं लोकमायंस्तानसुरा अन्वाजिगांसन् ŚatBr. XI.ii.7.26; सा हैनान्त्सह सोमेनाजगाम तामु ह गन्धर्वा अन्वाजग्मुः ŚatBr. (K.) IV.ii.4.3; IV.vi.2.7; अस्मिन् वा अयं लोके पुण्यं जीवित्वेष्टापूर्तेन तपसा सुकृतेनास्मान् अन्वागमिष्यति JaimiBr.1.97; स वै तथा कुर्विति होवाच यथा नावेतेनान्वागच्छान् JaimiBr.1.126; त्रिवृता वै स्तुवत इति मृत्युः पञ्चदश-मभिपर्येत्यातिष्ठद् इदमत एष्यन्तीति। तं पञ्चदशेऽन्वागच्छन् JaimiBr. 2.330; ते देवाः ... होचुरुपतज्जानीत यथा नो मनुष्या नान्वागच्छानिति JaimiBr. 2.423; एतान् स नान्वागच्छेत् JaimiBr. 3.372; (अग्नीषोमौ) तौ तमेवात्स्यतो रूपेणान्वागच्छेताम् ...) VādhūŚS. iv.65.2; दीदिवांसं त्वा वयमन्वामेमहि MānŚS. 94.1; राजानस्तमन्वाजग्मुरुत्सुकाः MahāBhā. vi.41.10; तव शस्त्रजिताँल्लोकान् ...। क्षिप्रमन्वागमिष्यामि MahāBhā. xi.20.21; **1B** to overtake याज्ञवल्क्यो रथमास्थायानुप्रधावयां चकार तं हान्वाजगाम ŚatBr. XI. vi.2.5; **1C** to pursue सा ह गाधेनातिससार। ताहान्वाजगाम रसायामन्तर् वलेनापिहिताः JaimiBr. 2.441; तस्यां हास्य ... पुत्रौ जज्ञाते। सा ह क्रुद्धा ज्ञातीन् आययौ। तां हान्वाजगाम JaimiBr. 3.72; मृत्युर्यदग्निः, स प्रजापतिमत्स्यतो रूपेणा-(न्वागच्छत् तम)भिपलायत VādhūŚS iii.19.3; नैनमन्वागमिष्यामि कदाचिद्धि शपेत्स माम् MahāBhā. i.44.7; **1D** to follow, i.e. to conform to rules, cf. **अन्वागत 1C**; **2Ai** to come near नक्षत्राणि सः (सोमः) ... अनुपेयमानानि ... अन्वागच्छत् KāṭhS. 11.3 (i.147.3); ते प्रायणीयमतन्वत तं प्रायणीयेन नेदीयोऽन्वागच्छंस्ते कर्मभिः ... तच्छंय्वन्तमकुर्वन् AitBr. 15.1 (415); **2Aii** to accompany सह वै देवाश्च मनुष्याश्चौदनपचन आसन् ... देवाः ... तांस्तस्मिन्नन्वागच्छन् KāṭhS. 8.7 (i.90.15); KapiKaS. 7.4 (75.9); सौमम् ... तंमग्नि'रन्वागच्छत् KāṭhS. 10.2 (i.126.6); **2B** to come (immediately) after तमेते गन्धर्वाः सोमरक्षा अन्वाजग्मुः ŚatBr. III. vi.2.17; तदिष्टाः प्रयाजा आसुः। अपर्यग्निकृतमथासुरा अन्वाजग्मुः ŚatBr. XII. ix.3.9; **2C** to inherit, cf. **अन्वागत 2B**; **3** (Refl.) to become known आत्मा ... हृदयमेव पुण्डरीकाकाशम् अन्ववक्रामति अन्वागच्छति हृदयेऽभिव्यक्त-विज्ञानो भवतीत्यर्थः BṛĀraUBh. (Śaṅ.) 602.16 (*on* iv.4.2)

**अन्वागम** (anv-āgama) *m.* act of coming after ते देवाः ... स्वर्गं लोकं गत्वान्वागमान्मनुष्याणां अबिभयुः JaimiBr. 2.423; ते मनुष्याणामन्वागमाद्बिभ्य-तस्त्रयं वेदमपीलयन् JaimiUBr. iii.19.2.

**अन्वागा** (anv-āgā-) II.P. [*gā* is substituted for *i-*,P.ii.4.45] **1A** to follow after षष्टिः सहस्रमनु गव्यमागात् ṚV.i.126.3; गायत्रं वत्समनु तास्त आगुः TaiBr. II.v.2.2; **1B** to continue अन्धः श्लोण इव हीयतां मा नोऽन्वागादघम् GopBr. i.2.7 (39.12); **2A** to come along ऋतस्य पन्थामनु तिस्र आगुस्त्रयो घर्मा अनु रेत आगुः AV.viii.9.13; AV. (P.) xvi.19.3; TaiS. IV.iii.11.1; MaiS. ii.13.10 (ii.160.5); KāṭhS. 39.10 (iv.126.5); पृथिव्यास्तमन्वागात् AV. (P.) xix.52.3; **2B** to come in the walk to meet ब्रह्म सरूपमनु मेदमागात् TaiĀ. iii.15.1 (352.2)

**अन्वाचक्ष्** (anv-ācakṣ-) II.Ā. **1Ai** to name after **ii** to mention **B** to refer to, to express **C** to state, to declare **D** to say accordingly, to agree **2A** to teach **B** to explain, to analyse **3** to expect, to wait **1Ai** to name after उतैनमेके वसिष्ठयज्ञ इत्याचक्षतऽएष वै वसिष्ठ एतमेव तदन्वाचक्षते ŚatBr. II.iv.4.2; ŚatBr. (K.) I.iii.4.1; **1Aii** to mention त्रीन्परान्पितॄनन्वाचष्टे ĀpaŚS. viii.16.7; आर्षेयमन्वाचष्टे ĀpaŚS. xxiv.5.4; भूतमर्थमन्वाचक्षते रुदितवान्रुद्रः ŚābaBh. 105.7 (*on* i.2.1); **1B** to refer to, to express राजन्यशब्दस्य राजशब्दप्रकृति-त्वमेवान्वाचक्षते TantrVā. 590.8 (*on* ii.3.3); अर्थवादशब्दाश्चेतरनैरपेक्ष्येणैव भूतार्थ-मन्वाचक्षते NyāyMāVi. 22.23 (*on* i.2.1); **1C** to state, to declare यथाशास्त्र-मुत्क्रान्तिक्रमं अन्वाचष्टे BrahmSūBh. (Śaṅ.) 799.3 (*on* iv.2.1); **1D** to say accordingly, to agree 'कथमसतः सज्जायेत' इति श्रुत्यन्तरमसतः सज्जन्मासंभव-मन्वाचष्टे न्यायतः TaiUBh. 256.18 (*on* 2.6); **2A** to teach तेभ्य एवं विप्रतिपन्न-बुद्धिभ्योऽध्येतृभ्य आचार्य इदं शास्त्रमन्वाचष्टे MahāBh.i.5.10 (*on* i.1.o); अन्वाचक्षीत शास्त्रं चेच्छब्दानसदपोद्धृतान्। एतेनैवाप्रमाणत्वमस्य TantrVā. 220.11 (*on* i.3.18); **2B** to explain, to analyse किं पुनस्तदिति सुहृद्भूत्वान्वाचष्टे ManuBh. i.190.5 (*on* 2.224); **3** to expect, to wait गोदोहमात्रं कालमन्वा-चक्षतेऽतिथिम् ... अन्वाचक्षते प्रतीक्षते ViraMi. (Āhnika.) 404.25.

**अन्वाचक्षाण** (anv-ācakṣāṇa) *adj.* **A** naming after संनीयेडाँ स्रक्तिषु पिण्डान्निदधात्यूर्ध्वं प्रपितामहात्त्रीनन्वाचक्षाणोऽमुतोऽर्वाचः MānŚS. 48.16; **B** stating, declaring, propounding सोऽयमर्थस्यानुपूर्वीमन्वाचक्षाणो नाभ्याख्येयः NyāyVār. 563.16 (*on* v.2.11); **C** analysing, deriving यद्यवयवव्युत्पत्त्या ... महेन्द्रशब्द-मन्वाचक्षाणैस्तद्धितानुगमः क्रियेत तत इन्द्र एव गुणमात्रविशिष्टोऽस्य ग्रहस्य देवतेति गम्येत TantrVā. 396.8 (*on* ii.1.16)

**अन्वाचम्** (anv-ācam-) I.P. **i** to sip after अथापोऽन्वाचामति शान्तिरसीति शान्तिर्वै भेषजमापः KauṣīBr.6.14 (27.16); **ii** to sip again or second time आचम्या-न्वाचामेत् ĀśvaŚS. I. i.13.1; आचमनीयेन अन्वाचामति ĀśvaGS. i.24.21 [to follow in rinsing the mouth, MW.]

**अन्वाचय** (anv-ācaya) *m.* **1** collection, aggregation कार्ये युगपदन्वाचय-यौगपद्यम् Vār. 16 *on* P.i.1.44; कार्येषु शब्देषु युगपदन्वाचयेन च यदुच्यते तस्य युगपद्वचनीयता प्राप्नोति MahāBh.i.104.21 (*on* i.1.44); अन्वाचयः समुच्चयोऽभिमतः Pradī. i.378A.26(*on* i.1.44); **2Ai** act of connecting the secondary element or action along with the primary one, one of the four meanings of the particle *ca* कः पुनश्चेन कृतोऽर्थः। समुच्चयोऽन्वाचयइतरेतरयोगः समाहार इति MahāBh. i.434.9 (*on* P.ii.2.29); (अनित्यत्वात्तु नैवं स्यात्) तु शब्दोऽन्वाचये ŚābaBh. 629.11 (*on* ii.4.5); 1499.7 (*on* vi.7.20); इतरेतरयोगे समाहारे चैकार्थीभावः संभवति न समुच्चये नाप्यन्वाचयः CāndraVyā.ii.2.48 (206.21); चकारः समुच्चयान्वा-चयेतरेतरयोगसमाहारेषु वर्तते ṬupṬ. 90.20 (*on* vi. 1.22); अन्वाचयोऽपि यत्रैकस्य प्राधान्यम्। इतरदप्रधानम् Nyās. i.395.6 (*on* ii.2.29); i.459.10 (*on* ii.4.33); (गीतानां छन्दकानां च भूयो वक्ष्याम्यहं विधिम्) चकारः सर्वशेषतां द्योतयति अन्वाचयं च AbhinBhā. i.192.21 (*on* 4.292); अन्वाचय इहान्यो यः सोऽपि नान्यः समुच्चयात् SaraKaṇṭhā. 485.2 (comm. अन्वाचयो यत्रैकं प्रधानमन्यदप्रधानमन्वीयते सः); बटो भिक्षामट, गां चानयेत्यन्वाचयोऽपि तिङन्तेषु दृश्यते ŚṛṅgāPra. 109.14; अन्वाचयसमाहारेतरेतरसमुच्चयविनियोगतुल्ययोगितावधारणहेतुषु GaṇRa.1.4(4); Prasā. i.305.3; हुल हिंसासंवरणयोश्च। चकारोऽन्वाचये DhātuPra.1.847 (61.11); चशब्दोऽवान्तरशङ्कापरिहारहेतुद्वयसमुच्चयार्थः अन्वाचये वा ŚrutaPra. i.296.11 (*on* i.2.6); यदानेकस्य प्राधान्यात्तदनुरोधेन त्वितरदन्वाचीयते तदान्वाचयः यथा – भिक्षामट गां चानय PadMañ. *on* KāśiVṛ. *on* P. ii.2.29 (139.5); Prasā. i.622.16 ; VaiyāBhū. 152.3 (*on* 30); समुच्चये अन्वाचये च तयोः साहित्यानवगमात्र द्विवचनबहुवचने TattvCin. iv (2).799.2; चत्वारश्चार्थाः। समुच्चयान्वाचयेतरेतर-योगसमाहाराः Subodhi. 77.19 (*on* 2.145); PrakriKau. i.622.4; BhāṭṭDī. ii.226.5 (*on* vi.1.5); SiddhāKau. 202A.9 (*on* ii.2.29); BhāṭṭCin. i.114.27 (*on* i.1.4); VaiyāBhū. 151.27 (*on* 30); क्यङ् स्यात् सान्ते सलोपश्च ... चकारोऽत्रान्वाचये न समुच्चये Prasā. ii.375.14; कृतकत्वेनाभेदकत्वाभिधानमन्वाचय एवेति चशब्देन सूचितम् MīmāKau. ii.119.15 (*on* ii.4.12); अहरहरिति समुच्चये प्रत्येकं गवादेः क्रियान्वयेन विशिष्टशक्त्यस्वीकारेणासामर्थ्यान्न सः। एवमन्वाचयेऽपि द्रष्टव्यम् VaiyāBhū. 151.25 (30); पुंवद्भावश्चेति चोऽन्वाचये इति भावः LaŚabdeŚe. ii.74.12; अन्वाचये आनुषङ्गिकत्वं व्याप्यत्वं च समभिव्याहृतक्रियागतं चार्थः LaŚabdeŚe. ii.126.7 [अन्वाचयसमाहारेतरेतरसमुच्चये AmaK. 2817; AgniP. 360.2; Vaija. 284.4; AnekāSaṁ. 7.8; ViśvaPra. 186.9; AnekāK. 977; NānārthSaṁ. 37.16; MediK. 195.13; NānārthaMa. 348; ŚabdaRa.(Vā.) 4512; ViśvaLoK. 407.12; KośaKaTa. 2.3136]; **2B** rule or matter of secondary importance (which is dependant on the primary one) अन्वाचये काष्ठमानय शाकमप्याहर्तव्यमिति। तत्र काष्ठान्यरण्यगमनप्रयोजकानि। इतरदप्रयोजकम् ṬupṬ. 95.9 (*on* vi. 1.22); इतरेतराश्रयापत्तेः। अन्वाचये निश्चिते स्वर्गकल्पना, तस्यां च सत्यामन्वाचयः TantrRa. 182.5 (*on* iv.3.22); स्याच्चेदन्वाचयस्तस्य भवेदन्योऽन्यसंश्रयः ŚāstrDī. 384.20 (*on* iv.3.9); इदं सूत्रं सर्ववेष्टनस्मृतेरप्रामाण्येऽन्वाचयत्वेन वस्त्रमहत्त्वविषय-लोभरूपहेतुपरतया व्याख्यायान्वाचयेनातीव प्रयोजनमिति मत्वा ... भाष्ये व्याख्यातम् MayūMāli. 25.1 (*on* i 3.3); **2C** secondary importance, i.e. casual or contextual nature गौणान् बाधकानप्याह ... अभ्युच्चयेन अन्वाचयेन, प्रसङ्गेनेति यावत्, बाधकाः Bhāsk. i.223.4 (*on* i 5.6)

**अन्वाचय** (anv-ācaya) *adj.* having secondary importance, i.e. having casual or contextual nature धर्मविचारापेक्षायाम् ... श्रुतिलिङ्गादिनिरूपणमन्वाचय-युक्तित्वेनैवोपन्यस्तम् ŚivārkaMaDī. i.81.32 (*on* i.1.1); (अभ्युच्चययुक्तिमपि आह) अभ्युच्चययुक्तिमन्वाचययुक्तिम् अप्रधानयुक्तिमिति यावत् स्वतन्त्रताखण्डनप्रसङ्गद्वारेण युक्तित्वात् Bhāsk. i.269.13 (*on* i.5.15)

**अन्वाचयकृत** (anvācaya-kṛta) *adj.* caused by the connection of the secondary action with the primary one अस्यैव चाङ्गुलीभ्याम् ... भ्रमरादिकान् कुर्यात् चकारेणान्वाचयकृतमङ्गुल्यन्तरस्य अधोमुखादिरूपत्वमनुजानाति AbhinBhā. ii.33.13 (*on* 9.31)